यावनः, पुं, (यवने यवनदेशे भवः । यवन+अण् ।) सिह्लकगन्धद्रव्यम् । इत्यमरः ।२।६।१२८॥ (विवृतिरस्य सिह्लकशब्दे ज्ञातव्या ॥)

यावनालः, पुं, (यवनाल एवेति । यवनाल+स्वार्थे अण् ।) धान्यविशेषः । जोयार इति भाषा । तत्पर्य्यायः । यवनालः २ शिखरी ३ वृत्ततण्डुलः ४ दीर्घनालः ५ दीर्घशरः ६ क्षेत्रेक्षुः ७ इक्षुपत्रकः ८ । तस्य गुणाः । धवलत्वम् । शैत्यत्वम् । बल्यत्वम् । त्रिदोषजित्त्वम् । वृष्यत्वम् । रुच्यत्वम् । अर्शो यक्ष्मगुल्मव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

यावनालशरः, पुं, (यावनाल इव शरः ।) शरभेदः । जोन्दरली इति हिन्दी भाषा । तत्पर्य्यायः । नदीजः २ दृढत्वक् ३ वारिसम्भवः ४ यावनालनिभः ५ खरपत्रः ६ । अस्य मूलगुणाः । ईषन्मधुरत्वम् । रुच्यत्वम् । शीतत्वम् । पित्तदाहनाशित्वम् । पशूनामबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

यावनाली, स्त्री, (यवनालस्य विकारः । यवनाल+अण् । ततो ङीप् ।) यावनालशर्करा । तत्पर्य्यायः । हिमोत्पन्ना २ हिमानी ३ हिमशर्करा ४ क्षुद्रशर्करिका ५ क्षुद्रा ६ गड्भा ७ जलबिन्दुजा ८ । अस्या गुणाः । शैत्यत्वम् । उष्णत्वम् । तिक्तत्वम् । अतिपिच्छिलत्वम् । वातघ्नत्वम् । सारकत्वम् । रुच्यत्वम् । दाहपित्तास्रदायित्वञ्च । इति राजनिर्घण्टः ॥

यावशूकः, पुं, (यवशूक एव । यवशूक+स्वार्थे अण् । यद्वा, यावस्य यवस्य शूकः कारणत्वेनास्त्यस्येति । अर्श आद्यच् ।) यवक्षारः । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने १ अध्याये ।

"क्षौमं प्लोतं पिचुं फेनं यावशूकं सधन्वनम् ।
कर्कशानि च पत्राणि लेखनार्थे प्रदापयेत् ॥")

यावसः, पुं, (यूयते इति । यु+"वहियुभ्यां णित् ।" उणा० ३।११६। इति असच् । तस्य णित्त्वञ्च । यद्वा, यवसानां समूहः । यवस+"तस्य समूहः ।" ४।२।३७ । इत्यण् ।) यवससमूहः । इति सिद्धान्तकौमुदी ॥

याव्यं, त्रि, (यूयते इति । यु+"आसुयुवपिरपिलपित्रपिचमश्च ।" ३।१।१२६ । इति ण्यत् ।) मिश्रणीयम् । यूयते यत् । इति मुग्धबोधव्याकरणम् ॥

याशोधरेयः, पुं, (यशोधरस्यापत्यं पुमान् । यशोधर+ढक् ।) शाक्यमुनिपुत्रः । इति हेमचन्द्रः ॥

याष्टीकः, पुं, (यष्टिः प्रहरणमस्य । यष्टि+"शक्तियष्ट्योरीकक् ।" ४ । ४ । ५९ । इति ईकक् ।) यष्टिधारियोद्धा । लेठेरा इति भाषा । तत्पर्य्यायः । याष्टिहेतिकः २ । इत्यमरः ।२।८।७०॥ (यथा, राजतरङ्गिण्याम् । ६ । २०२ ।

"आकलय्य द्रुतं दिष्ट्या सन्धाय प्रार्थनादिकम् ।
एष प्रभुत याष्टीकास्तस्य हन्तुं व्यसर्ज्जयत् ॥")

यासः, पुं, (यस+घञ् ।) दुरालभा । इत्यमरः । २ । ४ । ९१ ॥ (यथा,—

"यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया दुरभिग्रहा ।
यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः ॥
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठकासजित् ।
तृष्णाविसर्पवातास्रवमिज्वरहरः परः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यासा, स्त्री, (यासः प्रयत्नोऽस्त्यस्या इति अर्श आद्यच् । टाप् ।) मदनशलाकापक्षी । इति शब्दमाला ॥

यु, ङ क निन्दने । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) ङ क, यावयते । इति दुर्गादासः ॥ ("यावयते बाला वृद्धम् ।" इति मनोरमा ॥)

यु, ञ ग बन्धे । इति कविकल्पद्रुमः ॥ (क्र्या०-उभ०-सक०-सेट् ।) ञ ग, युनाति यो वयस्योऽपि न वेश्यावन्धकीजनैरिति हलायुधः । इति दुर्गादासः ॥

यु, ल मिश्रणे । अमिश्रणे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) ल, यौति । मिश्रणे यथा,—

"यौति काले कुशस्त्रीभिः सत्सम्मानहृद्वये ॥"
इति हलायुधः ॥

अमिश्रणे समवायलक्षणे । अयुतसिद्धानामिति मिलितसिद्धानामित्यर्थः । इति दुर्गादासः ॥

युक्, [ज्] त्रि, (युज्यते समाधत्ते इति । युज्ँ ङ् समाधौ+क्विप् ।) समाधिमान् । इति मुग्धबोधव्याकरणम् ॥ (युज्यते परस्परमिति ।) युग्मम् । इति शब्दरत्नावली ॥ (यथा, मनुः । ३ । २७७ ।

"युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते ।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम् ॥")

युक्, य, निन्दा । युज क ङ, निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम् ॥ (एतच्चिन्त्यम् ॥)

युक्तं, त्रि, (युज्यते स्म इति । युज्+क्तः ।) न्याय्यम् । तत्तु न्यायागतद्रव्यादिकम् । इत्यमरः । २ । ८ । २४ ॥ (यथा, शाकुन्तले । १ अङ्के ।

"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्त्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि ॥")

अपृथग्भूतम् । मिलितमित्यर्थः । इति मेदिनी । ते, ४७ ॥ (यथा, आनन्दलहर्य्याम् । १ ।

"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥")

युक्तं, क्ली, (युज्+क्तः ।) हस्तचतुष्टयम् । इति मेदिनी । ते, ४७ ॥

युक्तः, पुं, (युज्यते स्म योगेनेति । युज्+क्तः ।) अभ्यस्तयोगः । यथा,—

"योगज्ञो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"
इति भाषापरिच्छेदे । ६६ ॥

तस्य लक्षणं यथा, गीतायाम् । ६ । ८ ।

"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥"

"योगारूढस्य लक्षणं श्रेष्ठं चोक्तमुपसंहरति ज्ञानेति । ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य । अतः कूटस्थो निर्व्विकारः । अतएव विजितानि इन्द्रियाणि येन । अतएव समानि लोष्टादीनि यस्य । मृत्खण्डपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ॥" इति तट्टीकायां श्रीधरस्वामी ॥ (रैवतमनोः पुत्त्रः । यथा, हरिवंशे । ७ । २८ ।

"अथ पुत्त्रानिमांस्तस्य निबोध गदतो मम ।
धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः ॥")

युक्तरसा, स्त्री, (युक्तः रसोऽस्याः ।) रास्ना । इत्यमरभरतौ । २।४।१४० ॥ काँटा आमरुली इति भाषा । (तथास्याः पर्य्यायः ।

"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

युक्ता, स्त्री, (युक्त+टाप् ।) वृक्षविशेषः । इति रत्नमाला ॥ एलानी इति भाषा ॥

युक्तिः, स्त्री, (युज्यते इति । युज्+क्तिन् ।) न्यायः । इति मेदिनी । ते, ४७ ॥ (यथा, पञ्चतन्त्रे । ३ । १६३ ।

"तस्य तद्वचनं श्रुत्वा धर्म्मयुक्तिसमन्वितम् ।
उपगम्य ततोऽधृष्टः कपोतः प्राह लुब्धकम् ॥")

लोकव्यवहारः । इति व्यवहारमातृका ॥

"धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः ॥"
इति स्मृतिः ॥

अनुमानम् । यथा,—

"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ॥
युक्तिरनुमानम् ।
अनुमानेन निर्णेयं न स्यातां यत्र साक्षिणौ ।
इत्येकवाक्यत्वादिति विवरणम् ॥ अथ युक्तिः ।
नारदः ।
उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः ।
केशाकेशिगृहीतश्च युगपत् पारदारिकः ॥
कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः ।
तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः ॥
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः ।
असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम् ॥
प्रत्यक्षचिह्नैः रुधिराक्तखड्गादिभिः । पारुष्ये वाक्पारुष्ये । शङ्खः । लोप्त्रहस्तश्च चौर इति ।
नारदः ।
अभीक्ष्णं दिश्यमानोऽपि प्रतिहन्यान्न तद्वचः ।
त्रिचतुःपञ्चकृत्वो वा परतोऽर्थं समाचरेत् ॥
यदा धनिकेनाधमर्णिकस्त्रिचतुःपञ्चकृत्वो वा त्वं मे ऋणं धारयसीति पुनःपुनर्दिश्यमानोऽपि